## कर्मणि हनः । (८६/२९९७)

कर्मणि उपपदे हन्तेर्धातोः णिनिः प्रत्ययो भवति भूते [1]काले । पितृव्यघाती । मातुलघाती ।

[२६७] कुत्सितग्रहणं कर्तव्यम् ।
इति मा भूत्, चौरं हतवान् ॥

## ब्रह्मभ्रूणवृत्रेषु क्विप् । (८७/२९९८)

कर्मणि इति वर्तते । ब्रह्मादिषु कर्मसु उपपदेषु हन्तेर्धातोः क्विप् प्रत्ययो भवति [2]भूते । [3]ब्रह्महा । भ्रूणहा । वृत्रहा । किमर्थमिदमुच्यते यावता सर्वधातुभ्यः क्विप् [4]विहित एव ? ब्रह्मादिषु हन्तेः क्विब्वचनं नियमार्थम् । चतुर्विधश्चात्र नियम इष्यते[5] । ब्रह्मादिष्वेव हन्तेः, [6]नान्यस्मिन्नुपपदे, पुरुषं हतवान् इति । ब्रह्मादिषु[7] हन्तेरेव, [8]नान्यस्मात् स्यात्, ब्रह्म अधीतवान् इति । ब्रह्मादिषु हन्ते[9]र्भूतकाले क्विप् एव नान्यः प्रत्ययः, तथा [10]भूतकाले एव नान्यस्मिन्[11], ब्रह्माणं हन्ति हनिष्यति [12]वा इति । तदेतद् वक्ष्यमाणबहुल[13]ग्रहणस्य [14]पुरस्तादपकर्षणाल् लभ्यते ॥

## बहुलं छन्दसि । (८८/३४१९)

पूर्वेण नियमादप्राप्तः क्विप् प्रत्ययः विधीयते । छन्दसि विषये उपपदान्तरेष्वपि हन्तेर्बहुलं क्विप् प्रत्ययो भवति । मातृहा [15]सप्तमं नरकं व्रजेत् । पितृहा (छां. ७. १५२) । न च भवति । [16]मातृघातः । पितृघातः ॥

## सुकर्मपापमन्त्रपुण्येषु कृञः । (८९/२९९९)

कर्मणि इति वर्तते । तदसम्भवात् सुशब्दं वर्जयित्वा [17]परिशिष्टानां विशेषणं [18]भवति । स्वादिषु कर्मसूपपदेषु करोते[19]र्धातोः क्विप् प्रत्ययो भवति । सुकृत् । कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यकृत् । अयमपि नियमार्थ आरम्भः । त्रिविधश्चात्र नियम इष्यते । धातुनियमं वर्जयित्वा कालोपपदप्रत्यय[20]नियमः । धातोरनियतत्वादन्यस्मिन्नुपपदे अपि भवति । शास्त्रकृत् । भाष्यकृत् ॥

## सोमे सुञः । (९०/३०००)

कर्मणि [21]इति वर्तते । सोमे कर्मणि उपपदे सुनोतेर्धातोः क्विप् प्रत्ययो भवति[22] । सोमसुत्, सोमसुतौ, सोमसुतः । अयमपि नियमार्थ आरम्भः । चतुर्विधश्चात्र नियमः इष्यते, [23]धातुकालोपपदप्रत्ययविषयः ॥

---

1. काले नास्ति ब. फ. 2. भूते नास्ति ब. 3. ब्रह्माणं हतवान् इत्यधिकम् फ. 4. विहितः नास्ति फ, सिद्धः क. 5. धातूपपदप्रत्ययकालविषयः इत्यधिकम् क. 6. नान्येषु उपपदेषु क. 7. कर्मण्युपपदेषु इत्यधिकम् फ, कर्मसु उपपदेषु इत्यधिकम् क. 8. नान्यत् स्यात् फ, नान्यतः क. 9. भूते ब. 10. भूत एव फ. 11. काले इत्यधिकम् ब. क. 12. च क. 13. ग्रहणस्य नास्ति फ. 14. पुरस्तादपरस्ताल् ड. 15. सप्तमं नास्ति अ. ब. क. ड. 16. मातृघातः नास्ति ड. 17. परेषां शब्दानां क. 18. भवति नास्ति ब. क. ड. 19. धातोः नास्ति फ. 20. °विषयः ब. क. ड. 21. इत्येव अ. फ. 22. भूते इत्यधिकम् फ. 23. कालधातूपपदप्रत्ययविषयः फ.